# श्रीरामोदन्तम्

## अथ बालकाण्डम्

श्रीपतिं प्रणिपत्याहं श्रीवत्सांकितवक्षसम् /
श्रीरामोदन्तमाख्यास्ये श्रीवाल्मीकिप्रकीर्तितम् // १

पुरा विश्रवसः पुत्रो रावणो नाम राक्षसः /
आसीदस्यानुजौ चास्तां कुम्भकर्णविभीषणौ // २

ते तु तीव्रेण तपसा प्रत्यक्षीकृत्य वेधसम् /
वव्रिरे च वरानिष्टान् अस्मादाश्रितवत्सलात् // ३

रावणो मानुषादन्यैरवध्यत्वं तथात्मनः /
निर्देवत्वेच्छया निद्रां कुंभकर्णोवृणीत सः // ४

विभीषणो विष्णुभक्तिं वव्रे सत्वगुणान्वितः /
तेभ्य एतान् वरान् दत्वा तत्रैवान्तर्दधे प्रभुः // ५

रावणस्तु ततो गत्वा रणे जित्वा धनाधिपम् /
लंकापुरीं पुष्पकं च हृत्वा तत्रावसत्सुखम् // ६

यातुधानास्ततस्सर्वे रसातलनिवासिनः /
दशाननं समाश्रित्य लंकायां सुखमावसन् // ७

मंडोदरीं मयसुतां परिणीय दशाननः /
तस्यामुत्पादयामास मेघनादाह्वयं सुतम् // ८

रसां रसातलं चैव विजित्य स तु रावणः /
लोकानाक्रमयन् सर्वान् जहार च विलासिनीः // ९

दूषयन् वैदिकं कर्म द्विजानर्दयति स्म सः /
आत्मजेनान्वितो युद्धे वासवं चाप्यपीडयत् // १०

तदीयतरुरत्नानि पुनरानाय्य किंकरैः /
स्थापयित्वा तु लंकायामवसच्च चिराय सः // ११

ततस्तस्मिन्नवसरे विधातारं दिवौकसः /
उपगम्योचिरे सर्वं रावणस्य विचेष्टितम् // १२

तदाकर्ण्य सुरैस्साकं प्राप्य दुग्धोदधेस्तटम् /
तुष्टाव च हृषीकेशं विधाता विविधैस्तवैः // १३

आविर्भूयाथ दैत्यारिः पप्रच्छ च पितामहम् /
किमर्थमागतोसि त्वं साकं देवगणैरिति // १४

ततो दशाननात् पीडामजस्तस्मै न्यवेदयत् /
तच्छ्रुत्वोवाच धातारं हर्षयन् विष्टरश्रवाः // १५

अलं भयेनात्मयोने गच्छ देवगणैस्सह /
अहं दाशरथिर्भूत्वा हनिष्यामि दशाननम् // १६

आत्मांशैश्च सुरास्सर्वे भूमौ वानररूपिणः /
जायेरन् मम साहाय्यं कर्तुं रावणनिग्रहे // १७

एवमुक्त्वा विधातारं तत्रैवान्तर्दधे प्रभुः /
पद्मयोनिस्तु गीर्वाणैस्समं प्रायात् प्रहृष्टधीः // १८

अजीजनत् ततश्शक्रो वालिनं नाम वानरम् /
सुग्रीवमपि मार्ताण्डो हनूमन्तं च मारुतः // १९

पुरैव जनयामास जांबवंतं च पद्मजः /
एवमन्ये च विबुधाः कपीनजयन् बहून् // २०

ततो वानरसंघानां वाली परिवृढोभवत् /
अमीभिरखिलैस्साकं किष्किन्धामद्युवास च // २१

आसीद्दशरथो नाम सूर्यवंशेथ पार्थिव: /
भार्यास्तिस्रोपि लब्ध्वासौ तासु लेभे न संततिम् // २२

ततस्सुमन्त्रवचनात् ऋश्यशृंगं स भूपति: /
आनीय पुत्रकामेष्टिमारेभे सपुरोहितः // २३

अथाग्नेरुत्थित: कश्चित् गृहीत्वा पायसं चरुम् /
एतत् प्राशय पत्नीस्त्वं इत्युक्त्वादान्नृपाय स: // २४

तद्गृहीत्वा तदैवासौ पत्नी: प्राशयदुत्सुक: /
ताश्च तत्प्राशनादेव नृपाद्गर्भमधारयन् // २५

पूर्णे कालेथ कौसल्या सज्जनांभोजभास्करम् /
अजीजनद्रामचंद्रं कैकेयी भरतं तथा // २६

ततो लक्ष्मणशत्रुघ्नौ सुमित्राजीजनत् सुतौ /
अकारयत् पिता तेषां जातकर्मादिकं द्विजै: // २७

ततो ववृधिरेन्योन्यं स्निग्धास्चत्वार एव ते /
सकलासु च विद्यासु नैपुण्यमभिलेभिरे // २८

तत: कदाचिदागत्य विश्वामित्रो महामुनि: /
ययाचे यज्ञरक्षार्थं रामं शक्तिधरोपमम् // २९

वसिष्ठवचनाद्रामं लक्ष्मणेन समन्वितम् /
कृच्छ्रेण नृपतिस्तस्य कौशिकस्य करे ददौ // ३०

तौ गृहीत्वा ततो गच्छन् बलामतिबलां तथा /
अस्त्राणि च समग्राणि ताभ्यामुपदिदेश स: // ३१

गच्छन् सहानुजो राम: कौशिकेन प्रचोदित: /

ताटकामवधीत् धीमान् लोकपीडनतत्पराम् // ३२

ततस्सिद्धाश्रमं प्राप्य कौशिकस्सहराघवः /
अध्वरं च समारेभे राक्षसास्च समागमन् // ३३

राघवस्तु तथास्त्रेण क्षिप्त्वा मारीचमर्णवे /
सुबाहुप्रमुखान् हत्वा यज्ञं चापालयन् मुनेः // ३४

कौशिकेन ततो रामो नीयमानः सहानुजः /
अहल्याशापनिर्मोक्षं कृत्वा सम्प्राप मैथिलम् // ३५

जनकेनार्चितो रामः कौशिकेन प्रचोदितः /
सीतानिमित्तमानीतं बभंज धनुमैश्वरम् // ३६

ततो दशरथं दूतैरानाय्य मिथिलाधिपः /
रामादिभ्यस्तत् सुतेभ्यः सीताद्याः कन्यका ददौ // ३७

ततो गुरुनियोगेन कृतोद्वाहः सहानुजः /
राघवो निर्ययौ तेन जनकेनोरुमानितः // ३८

तदाकर्ण्य धनुर्भंगं आयान्तं रोषभीषणम् /
विजित्य भार्गवं रामं अयोध्यां प्राप राघवः // ३९

ततः सर्वजनानंदं कुर्वाणश्चेष्टितैस्वकैः /
तामध्युवास काकुस्थस्सीतया सहितः सुखम् // ४०

इति बालकाण्डम् सम्पूर्णम्

अथ अयोध्याकाण्डम्

एतस्मिन्नन्तरे गेहं मातुलस्य युधाजितः /
प्रययौ भरतः प्रीतः शत्रुघ्नेन समन्वितः // १

ततः प्रकृतिभिस्साकं  मन्त्रयित्वा स भूपतिः /
अभिषेकाय रामस्य समारेभे मुदान्वितः //  २

कैकेयी तु महीपालं मन्थरादुषिताशया  /
वरद्वयं पुरा दत्तं य़य़ाचे सत्यसंगरम्  //  ३

वनवासाय रामस्य राज्याप्तै भरतस्य च  /
तस्या वरद्वयं कृच्छ्रमनुजज्ञे महीपतिः //  ४

रामं तदैव कैकेयी वनवासाय चादिशत्  /
अनुज्ञाप्य गुरून् सर्वान् निर्ययौ च वनाय सः // ५

दृष्ट्वा तं निर्गतं सीता लक्ष्मणश्चानुजग्मतुः  /
संत्यज्य स्वगृहान् सर्वे पौराश्चानुययुर्द्रुतम्  //  ६

वंचयित्वा कृशान् पौरान् निद्राणान् निशि राघवः /
वाह्यमानं सुमन्त्रेण रथमारुह्य चागमत्  //   ७

शृंगिबेरपुरं गत्वा गंगाकूलेऽथ राघवः   /
गुहेन सत्कृतस्तत्र निशामेकामुवास च //  ८

सारथिं सन्निमन्त्र्यासौ सीतालक्ष्मणसंयुतः  /
गुहेनानीतया नावा संततार च जाह्नवीम्  //  ९

भरद्वाजमुनिं प्राप्य तं नत्वा तेन सत्कृतः  /
राघवस्तस्य निर्देशात् चित्रकूटेऽवसत् सुखम् // १०

अयोध्यां तु ततो गत्वा सुमन्त्रः शोकविह्वलः /
राज्ञे निवेदयत्सर्वं राघवस्य विचेष्टितम्  //  ११

तदाकर्ण्य सुमन्त्रोक्तं राजा दुःखविमूढधीः /

राम रामेति विलपन् देहं त्यक्त्वा दिवं ययौ // १२

मन्त्रिणस्तु वसिष्टोक्त्या देहं संरक्ष्य भूपतेः /
दूतैरानाययामासुः भरतं मातुलालयात् // १३

भरतस्तु मृतं श्रुत्वा पितरं कैकयीगिरा /
सम्स्कारादि चकारास्य यथाविधि सहानुजः // १४

अमात्यैः चोद्यमानोपि राज्याय भरतस्तदा /
वनायैव ययौ राममानेतुं नागरैस्सह // १५

स गत्वा चित्रकूटस्थं रामं चीरजटाधरम् /
ययाचे रक्षितुं राज्यं वसिष्टाद्यैर्द्विजैस्सह // १६

चतुर्दश समा नीत्वा पुनरेष्याम्यहम् पुरीम् /
इत्युक्त्वा पादुके दत्वा तं रामं प्रत्ययापयत् // १७

गृहीत्वा पादुके तस्मात् भरतो दीनमानसः /
नन्दिग्रामे स्थितस्ताभ्यां ररक्ष च वसुंधराम् // १८

राघवस्तु गिरेस्तस्मात् गत्वात्रिं समवन्दत /
तत्पत्निस्तु तदा सीतां भूषणैस्वैरभूषयत् // १९

उषित्वा तु निशामेकां आश्रमे तस्य राघवः /
विवेश दण्डकारण्यं सीतालक्ष्मणसंयुतः // २०

इति अयोध्याकाण्डम् सम्पूर्णम्

अथ अरण्यकाण्डम्

व्रजन् वनेन काकुत्स्थो विराधं विधिचोदितम् /
सदारानुजमात्मानं हरन्तमवधीत् तदा // १

शरभंगाश्रमं प्राप्य स्वर्गतिं तस्य वीक्ष्य स: /
प्रतिजज्ञे राक्षसानां वधं मुनिभिरर्थित:  //  २

तस्मात् गत्वा सुतीक्ष्णं च प्रणम्यानेन पूजित: /
अगस्त्याश्रमं प्राप्य तं नमाम रघूत्तम: //    ३

रामाय वैष्णवं चापं ऐन्द्रं तूणीयुगं तथा /
ब्राह्मं चास्त्रं च खड्गं च प्रददौ कुंभसंभव:  //  ४

तत: स गच्छन् काकुत्स्थ: समागम्य जटायुषम् /
वैदेह्या: पालनायैनं श्रद्दधे पितृवत्सलम् //  ५

तत: पंचवटीं प्राप्य तत्र लक्ष्मणनिर्मिताम् /
पर्णशालामध्युवास सीतया सहितं सुखम् //  ६

तत्राभ्येदकदा रामं वव्रे शूर्पणखाभिधा /
तन्निरस्ता लक्ष्मणं च वव्रे सोऽपि निराकरोत् // ७

राममेव ततो वव्रे कामार्ता कामसन्निभम्  /
पुनश्च धिक् कृता तेन सीतामभ्यद्रवत् रुषा //  ८

लक्ष्मणेन ततो रोषात् क्रत्तश्रवणनासिका /
सा तु गत्वा जनस्थानं  खरायैतन्यवेदयत् //  ९

तदाकर्ण्य खर: क्रुद्धो राघवं हंतुमाययौ /
दूषणत्रिशिरैर्मुख्यै: यातुधानै: समन्वित: //  १०

तत्क्षणं लक्ष्मणे सीतां निधाय रघुनन्दन: /
खरं सहानुगं संख्ये जघान लघुविक्रम: // ११

तत: शूर्पणखा गत्वा लंकां शोकसमन्विता /

न्यवेदयत् रावणाय वृत्तांतं सर्वमादित:  //  १२

तच्छ्रुत्वा रावण: सीतां हर्तुं कृतमतिस्तदा /
मारीचस्याश्रमं प्राप्य साहाय्ये तमचोदयत् // १३

सोऽपि स्वर्णमृगो भूत्वा सीताया: प्रमुखेऽचरत् /
सा तु तं मृगमाहर्तुं भर्तारं समयाचत //  १४

नियुज्य लक्ष्मणं सीतां रक्षितुं रघुनंदन: /
अन्वगच्छत् मृगं तूर्णं द्रवन्तं काननान्तरे // १५

विव्याध च मृगं राम: निजरूपसमास्थित: /
हा सीते लक्ष्मणेत्येवं रुदन् प्राणान् समत्यजत्  // १६

एतदाकर्ण्य वैदेह्या लक्ष्मणश्चोदितो भृशम् /
तद्रक्षां देवता: प्रार्थ्य प्रययौ राघवान्तिकम् // १७

तदन्तरं समासाद्य रावणो यतिरूपधृत् /
सीतां गृहीत्वा प्रययौ गगनेन मुदान्वित: // १८

ततो जटायुरालोक्य नीयमानां तु जानकीम्  /
प्राहरत् रावणं प्राप्य तुण्डपक्षनखैर्भृशम् //  १९

छित्वैनं चन्द्रहासेन पातयित्वा च भूतले  /
गृहीत्वा रावण: सीतां प्राविशन्निजमन्दिरम् // २०

अशोकवनिकामध्ये संस्थाप्य जनकात्मजाम्  /
रावणो रक्षितुं चैनां नियुयोज निशाचरी:  //  २१

हत्वा रामस्तु मारीचं आगच्छदनुजेरिताम् /
वार्तामाकर्ण्य दु:खार्त: पर्णशालामुपागमत् //  २२

अदृष्ट्वा तत्र वैदेहीं विचिन्वानो वनान्तरे /
सहानुजो गृध्रराजं छीन्नपक्षं ददर्श स: // २३

तेनोक्तां जानकीवार्तां श्रुत्वा पश्चात् मृतं च तम् /
दग्ध्वा सहानुजो राम: चक्रे तस्योदकक्रियाम् // २४

आत्मनोऽभिभवं पश्चात् कुर्वतीं पथि लक्ष्मण: /
आयोमुखीं चकाराशु कृत्तश्रवणनासिकाम् // २५

गृहीतौ तौ कबन्धेन भुजौ तस्य न्यकृन्तताम् /
ततस्तु याचितौ तेन तद्देहं देहतुश्च तौ // २६

स तु दिव्याकृतिर्भूत्वा रामं सीतोपलब्धये /
सुग्रीवमृश्यमूकस्थं याहीत्युक्त्वा दिवं ययौ // २७

तत: प्रीतो रघुश्रेष्ट: शबर्य्याश्रमभ्ययात् /
तयाभिपूजित: पश्चात् पंपां प्राप सलक्ष्मण: // २८

इति अरण्यकाण्डम् सम्पूर्णम्

## अथ किष्किन्धाकाण्डम्

हनुमानथ सुग्रीवनिर्दिष्टो रामलक्ष्मणौ /
प्राप्य श्रुत्वा तु वृत्तांतं तेन तौ समयोजयत् // १

ततो रामस्य वृत्तांतं सुग्रीवाय निवेद्य स: /
सख्यं च कारयामास तयो: पावकसन्निधौ // २

प्रतिजज्ञे तदा रामो हनिष्यामीति वालिनम् /
दर्शयिष्यामि वैदेहीं इत्यन्येन च संश्रुतम् // ३

सुग्रीवॆणाथ रामाय भ्रातृवैरस्य कारणम् /
निवेदितमशेषं च बलाधिक्यं च तस्य तत् // ४

तत्क्षणं दुन्दुभेः कायं सुग्रीवेण प्रदर्शितम् /
सुदूरं प्रेषयामास पादांकुष्टेन राघवः // ५

पुनश्च दर्शितान् तेन सालान् सप्त रघूत्तमः /
बाणेनैकेन चिच्छेद सार्धं तस्यानुशंकया // ६

किष्किन्धां प्राप्य सुग्रीवः ततो रामसमन्वितः /
जगर्जातीव संहृष्टः कोपयन् वानराधिपम् // ७

वाली निष्क्रम्य सुग्रीवं समरेऽपीडयत् भृशम् /
सोऽपि संभग्नसर्वांगः प्रधावत् राघावान्तिकम् // ८

कृतचिह्नस्तु रामेण पुनरेव स बालिनम् /
रणायाह्वयत क्षिप्रं तस्थौ रामस्तिरोहितः // ९

हेममाली ततो वाली तारयाभिहितं हितं /
निरस्य कुपितो भ्रात्रा रणं चक्रे सुदारुणम् // १०

बाणेन वालिनं रामो विध्वा भूमौ न्यपातयत् /
सोऽपि राम इति ज्ञात्वा देहं त्यक्त्वा दिवं ययौ // ११

पश्चात्तपंतं सुग्रीवं समाश्वास्य रघूत्तमः /
वानराणामधिपतिं चकाराश्रितवत्सलः // १२

ततो माल्यवतः पृष्ठे रामो लक्ष्मणसंयुतः /
उवास चतुरो मासान् सीताविरहदुःखितः // १३

अथ रामस्य निर्देशात् लक्ष्मणो वानराधिपम् /
आनयत् प्लवगैस्सार्धं हनूमत्प्रमुखैर्गिरिम् // १४

सुग्रीवो राघवं द्रुष्ट्वा वचनात्तस्य वानरान् /
न्ययुङ्त सीतामन्वेष्टुं आशासु चतसृर्ष्वपि // १५

ततो हनूमत: पाणौ ददौ रामोङ्गुलीयकम् /
विश्वासाय च वैदेहया तद् गृहीत्वा स निर्ययौ // १६

ततो हनूमत्प्रमुखा: वानरा दक्षिणां दिशम् /
गत्वा सीतां विचिन्वन्त: पर्वतं विन्ध्यमाप्नुवन् // १७

समयातिक्रमात्तत्र चक्रु: प्रायोपवेशनम् /
ते०त्र संपातिना प्रोक्तां सीतावार्तां च शुश्रुवु: // १८

तत: प्रापुरदन्वंतं अंगदाद्या: प्लवंगमा: /
तां विलंघयितुं तेषां न कश्चिदभवत् क्षम: // १९

स्वप्रभावप्रशंसाभिस्तदा जांबवदुक्तिभि:/
संवर्धितो महेन्द्राद्रिं आरुरोहानिलात्मज: // २०

इति किष्किन्धाकाण्डम् सम्पूर्णम्

## अथ सुन्दरकाण्डम्

अभिवाद्याथ सकलान् अमरान् पवनात्मज: /
पुप्लुवे च गिरेस्तस्मात् विलंघयितुमर्णवम् // १

स समुल्लंघ्य मैनाकं सुरसामभिवाद्य च /
निहत्य सिम्हिकां नीत्या परं प्राप महोदधे: // २

लंकाधिदेवतां जित्वा तां प्रविश्यानिलात्मज: /
सीतां विचिन्वन्नद्राक्षीत् निद्राणं निशि रावणम् // ३

अपश्यन् तत्र वैदेहीं विचिन्वानस्ततस्ततः /
अशोकवनिकां गत्वा सीतां खिन्नां ददर्श सः // ४

पादपं कंचिदारुह्य तत्पलाशैस्सुसंवृतः /
आस्ते स्म मारुतिस्तत्र सीतेयमिति तर्कयन् // ५

रावणस्तु तदाऽभ्येत्य मैथिलीं मदनार्दितः /
भार्या भव ममेत्येवं बहुधा समयाचत // ६

अहम् त्वदनुगा न स्यां इत्येषा तं निराकरोत् /
काममन्युपरीतात्मा रावणोथ गृहं ययौ // ७

गते तु रावणे सीतां प्रलपन्तीं स मारुतिः /
उक्त्वा रामस्य वृत्तान्तं प्रददौ चांगुलीयकम् // ८

तत्समादाय वैदेही विलप्य च भृशं पुनः /
चूडामणिं ददौ तस्य करे सा मारुतेः प्रियम् // ९

मा विषादं कृथा देवि राघवो रावणं रणे /
हत्वा त्वां नेष्यतीत्येनां आश्वस्य स विनिर्ययौ // १०

नीतिमान् सोऽपि संचिन्त्य बभंजोपवनं च तत् /
अक्षादीनि च रक्षांसि बहूनि समरेऽवधीत् // ११

ततः शक्रजिता युद्धे बद्धः पवननन्दनः /
प्रतापं रामदेवस्य रावणाय न्यवेदयत् // १२

रक्षोदीपितलांगूलः स तु लंकामशेषतः /
दग्ध्वा सागरमुत्तीर्य वानरान् समुपागमत् // १३

स गत्वा वानरैस्साकं राघवायात्मना कृतम् /

निवेदयित्वा सकलं ददौ चूडामणिं च तम् //  १४

इति सुन्दरकाण्डम् सम्पूर्णम्

अथ युद्धकाण्डम्

अथासंख्यै: कपिगणै: सुग्रीवप्रमुखै: सह् /
निर्ययौ राघवस्तूर्णं तीरं प्राप महोदधे:  // १

तदा विभीषणो भ्रात्रा त्यक्तो राममुपागमत् /
लंकाधिपत्येऽभ्यषिंचत् एनं रामोऽरिमर्दन:  // २

उक्तमार्ग: समुद्रेण तत्र सेतुं नळेन स:  /
कारयित्वा तेन गत्वा सुवेलां प्राप पर्वतम् // ३

ततो राघवनिर्दिष्टा: नीलमुख्या: प्लवंगमा:  /
रुरुधु: सर्वतो लंकां वृक्षपाषाणपाणय: //  ४

रावणस्य नियोगेन निर्गतान् युधि राक्षसान् /
प्रहस्तप्रमुखान् हत्वा नेदुस्ते सिम्हविक्रमा:  // ५

सुग्रीवश्च हनूमांश्च तथा राघवलक्ष्मणौ  /
राक्षसान् सुबहून् युद्धे जघ्नन् भीमपराक्रमा: // ६

रावणिस्तु ततोऽभ्येत्य समरे रामलक्ष्मणौ  /
ननाह नागपाशेन नागारिस्तौ व्यमोचयत् //  ७

रावणोऽपि ततो युद्धे राघवेन पराजित:  /
कुंभकर्णं प्रबोध्याशु रामं हन्तुं न्ययुङ्क्त च //  ८

ततो वानरसंघांश्च भक्षयंतं निशाचरम्  /
इन्द्रेणास्त्रेण रामोऽपि निजघान रणे भृशम् //  ९

ततो रावणसंदिष्टौ देवान्तकनरान्तकौ /
हनूमदंगदाभ्यां तु निहन्तौ रणमूर्धनि // १०

अथातिकायमायान्तं रथमारुह्य वाहिनीम् /
अर्दयन्तं महाकायं लक्ष्मणश्चावधीच्छरै: // ११

ततो रावणसंदिष्ट: शक्रजित् राघवौ रणे /
ब्रह्मास्त्रेण च तौ बद्ध्वा वानरान्श्चावधीच्छरै: // १२

अथ जांबवतो वाक्यात् गत्वा चौषधिपर्वतम् /
मारुतिश्चौषधीस्तत्र॰दृष्ट्वा कोपं चकार स: // १३

भूधरं तं समुत्पाट्य गृहीत्वा पुनरागत: /
तासां गन्धेन वै सर्वान् राघवादीनजीवयत् // १४

रावण: कपिभिर्दग्धां पुरीं वीक्ष्य रुषान्वित: /
न्ययुङ्क्त कुंभकर्णस्य पुत्रौ हन्तुं च राघवौ // १५

अथार्दयन्तौ तत्सैन्यं वीक्ष्य तौ बलशालिनौ /
कुंभं रामोवधीत् बाणै: निकुंभं चात्मजो रवॆ: // १६

तत: खरात्मजं तेन रावणेन प्रचोदितम् /
पीडयंतं कपीन् बाणैर्जघानास्त्रेण राघव: // १७

तत: संतप्तहृदयो रावणो युद्धदुर्मदम् /
प्रचोदयामास सुतं युद्धे हन्तुं स राघवौ // १८

नगरान्निर्ययौ तूर्णं इन्द्रजित् समितिंजय: /
मायासीतां विनिक्षिप्य सर्वेषां मोहनाय वै // १९

वानरेष्वपि पश्यत्सु हनूमत्प्रमुखेषु च /

जघान सीतां खड्गेन शितेन समितिंजय: // २०

युद्धं त्यक्त्वा तत: सर्वै: वानरैस्स परीवृत: /
दु:खितो हनुमान् तत्र यत्र रामोव्रजल्लघु // २१

उपगम्याब्रवीद्रामं हनूमान्निखिलं तदा /
श्रुत्वा वृत्तान्तमखिलं रामो मोहमवाप स: // २२

विभीषणोथ संप्राप्य दृष्ट्वा रामं च मूर्छितम् /
विषण्णन् वानरान् वाचा सान्त्वयन्निदमब्रवीत् // २३

मिथ्याविषादं संत्यज्य जगन्नायक हे प्रभो /
श्रुणु मे०भिहितं वाक्यं ज्ञात्वा रावणिमानसम् // २४

दुरात्मना कृता माया राक्षसेन्द्रसुतेन वै /
निकुम्भिलायां होमं तु कृतं तेनाधुना किल // २५

लक्ष्मणं प्रेषयाद्यैव मया सह समन्त्रिणा /
कृते होमे तत्र रिपुरजेयो भवति ध्रुवम् // २६

उवाच राम: सौमित्रिं राक्षसेन्द्रसुतं जहि /
गच्छेति शीघ्रं सुहृदा रावणस्यानुजेन ह // २७

लक्ष्मणस्तु तदा रामं आमन्त्र्य सविभीषण: /
निकुम्भिलां प्राप तूर्णं इन्द्रजित् यत्र वर्तते // २८

अदर्शयत् भ्रातृपुत्रं धर्मात्मा स विभीषण: /
लक्ष्मणो भेदयामास राक्षसान् शरसंचयै: // २९

कृत्वा चिरं तत्र युद्धं ऐन्द्रेणास्त्रेण वै रुषा /
शिरश्चिछेद सौमित्रि: दशाननसुतस्य हि // ३०

स सुतस्य वधं श्रुत्वा रावण: शोककर्शित: /
नष्टधैर्यो विह्वलांगो विललपाकुलेन्द्रिय: // ३१

निरर्थकं तु मज्जन्म जल्पितं च निरर्थकम् /
येनाहमद्य पश्यामि हतमिन्द्रजितं रणे // ३२

क्व गतोऽसि हत: शूर! मानुषेण पदातिना /
राज्यात् भ्रष्टेन दीनेन त्यक्त्वा मां पुत्र जीवितम् // ३३

इन्द्रं जित्वा तु तं बद्ध्वा लंकामानीय वै बलात् /
अकरोस्त्वं प्रतापेन कारागृहनिवासिनम् // ३४

मोचयामास ब्रह्मा त्वां सान्त्वयित्वामराधिपम् /
तादृक्त्वं कुत्र मां त्यक्त्वा गतोऽद्य सुदुरासद: // ३५

किं करिष्याम्यहं पुत्र! क्व गच्छामि वदाधुना /
नय मां यत्र गंतासि तत्र ते न विलंबनम् // ३६

लोकेषु त्वत्समो नास्ति तादृशस्य पितास्म्यहम् /
इत्याशया स्थितं पुत्र गर्वितेन मयाऽत्र हि // ३७

धूम्राक्षो वज्रदंष्ट्रस्च कुंभकर्ण: प्रतापवान् /
राक्षसा निहतास्सर्वे प्रहस्तप्रमुखा अपि // ३८

अनादृत्य तु तान् सर्वान् राक्षसान् प्रहृतानपि /
अवष्टभ्य बलं पुत्र सुखेनावस्थितं तव // ३९

इत्येवं बहुधा तत्र विलप्य स तु रावण: /
अन्तर्नियम्य दु:खानि कोपं चक्रे सुदारुणम् // ४०

रथं सूत ममाग्रे त्वं क्षिप्रं कुरु जयैषिण: /
रामं सलक्ष्मणं हन्तुं निर्गमिष्याम्यहं चिरात् // ४१

इत्युक्त्वा रथमारुह्य शीघ्रं सारथिवाहितम् /
रामेण सह संगम्य युद्धं चक्रे सुदारुणम् // ४२

ततो मातलिनानीतं रथमैन्द्रं समारुहन् /
रराज रामो धर्मात्मा ह्युदयस्थो यथा रवि: // ४३

चकार युद्धं तुमुलं देववृन्दे च पश्यति /
सीताहरणजात् कोपात् रामो धर्मभृतां वर: // ४४

अथागस्त्यस्य वचनात् रावणं लोककण्टकम् /
जघान रामो लक्ष्मीवान् ब्रह्मेणास्त्रेण तं रणे // ४५

मण्दोदरी वधं श्रुत्वा भर्तु: प्रियतरस्य च /
विललाप रणं श्रुत्वा कुररीव भृशातुरा // ४६

विभीषणोऽथ रामेण संदिष्ट: सह राक्षसै: /
चकार दहनं तस्य रावणस्य गतायुष: // ४७

अथाग्निवचनात् सीतं रामो वीक्ष्य सुनिर्मलाम् /
संदिष्टो देववृन्दैश्च जग्राह पितृसन्निधौ // ४८

तवैव युक्तं कर्मैतत् सर्वलोकभयंकरम् /
तद्वैदेह्या कृते राम! सा तु लक्ष्मीर्भवान् स्वभू: // ४९

इत्येवं देवसंघैश्च मुनिभिश्चाभिपूजित: /
लक्ष्मणश्च तुतोषाथ रामो विश्वासमाययौ // ५०

विभीषणस्य धर्मात्मा सत्यसंध उदारधी: /
कारयामास लक्ष्मीवान् अनुजेनाभिषेचनम् // ५१

तथा पुष्पकमारुह्य सहमित्रैर्जगत्पति: /

भार्यानुजाभ्यां सहित: किष्किन्थां प्राप राघव: // ५२

किष्किन्थानिलयास्सर्वा: कपीनां योषिता: प्रिया: /
सीताकुतूहलात् पुष्पं विमानं ता: समारुहन् // ५३

अथ दाशरथि: श्रीमान् भरतं द्रष्टुमिच्छया /
भरद्वाजाश्रमं प्राप्त: तत्र तेन निवारित: // ५४

भरतस्यान्तिकं राम: प्रेषयामास मारुतिम् /
रामस्यादर्शनात् वह्निप्रवेशं कांक्षतो भृशम् // ५५

तत्र तेन मुनीन्द्रेण सानुज: ससुहृद्गण: /
संतोषविवशॆनाथ रामोपि विधिपूजित: // ५६

रामो०थ सह संगम्य भरतेनारिघातिना /
अयोध्यां प्राविशत्तूर्णं मातृभिश्चाभिनन्दित: // ५७

अथायोध्यानिवासास्ते जनास्सर्वे०पि तोषिता: /
अभिगम्याब्रुवन् रामं धन्या वयमिति द्रुतम् // ५८

चातकस्तु घनान् दृष्ट्वा मयूराश्च यथा शिशून् /
आसाद्य मातरस्तोषं तथा प्रापुर्जना भुवि // ५९

अथाभिषेकं रामस्य वसिष्टाद्या मुदान्विता: /
सहिता मन्त्रिभिश्चक्रु: वसवो वासवं यथा // ६०

अभिषेकोत्सवे सर्वे सुग्रीवाद्या कपीश्वरा: /
यथार्हं पूजिताश्चासन् सृग्गंधांबरभूषणै: // ६१

विशिष्य मुक्ताहारेण सीतया हनुमान् मुदम् /
पूजितश्च तदा लेभे यथा सीतावलोकने // ६२

सर्वासां वानरीणां च कौसल्या पुत्रवत्सला /
भूषणैर्भूषयामास वस्त्रचंदनकुंकुमै: // ६३

रामाज्नयाथ सर्वेऽपि सुग्रीवादि प्लवंगमा: /
किष्किन्धां लेभिरे कृच्छ्रात् श्रीरामविरहातुरा: // ६४

अतिभक्तो दीर्घजीवी लंकासमरसाधक: /
अनुज्नात: स रामेण लंकां प्रायात् विभीषण: // ६५

पितु: सिंहासनं प्राप्य भ्रातृभि: सहितोऽनघ: /
विरराज तथा रामो यथा विष्णुस्त्रिविष्टपे // ६६

लक्ष्मणानुमते रामो यौवराज्यं तु दत्तवान् /
भरतायाप्रमेयाय प्राणात् प्रियतराय स: // ६७

चत्वारस्ते महात्मान: सभार्या रघुसत्तमा: /
खे सतारो यथा चंद्र: तथा रेजु: स्वपत्तने // ६८

इति युद्धकाण्डं सम्पूर्णम्

अथ उत्तरकाण्डम्

राजा पर्यग्रहीदेव भार्यां रावणदूषिताम् /
इत्यज्ञजनवादेन रामस्तत्याज मैथिलीम् // १

तद्विदित्वाथ वाल्मीकि: आनीयैनां निजाश्रमम् /
अन्तर्वन्तीं समाश्वास्य तत्रैवावासयत् सुखम् // २

ऋषिभि: प्रार्थितस्याथ राघवस्य नियोगत: /
शत्रुघ्नो लवणं युद्धे निहत्यैनानपालयत् // ३

रामे हेममयीं पत्नीं कृत्वा यज्ञं वितन्वति /

आनीय ससुतां सीतां तस्मै प्राचेतसॊ ददौ // ४

शंक्यमाना पुनश्चैवं रामेण जनकात्मजा /
भूम्या प्रार्थितया दत्तं विवरं प्रविवेश सा // ५

अथ रामस्य निर्देशात् पौरैः सह वनौकसः /
निमज्य सरयूतीर्थे देहं त्यक्त्वा दिवं ययौ // ६

ततो भरतशत्रुघ्नौ निजं रूपमवापतुः /
रामोऽपि मानुषं रूपं त्यक्त्वा धामाविशत् स्वकम् // ७

श्रीरामोदंतमाख्यातं इदं मन्दधिया मया /
समीक्ष्य निपुणैः सद्भिः संशोद्ध्य परिगृह्यताम् // ८

यस्तु दाशरथिर्भूत्वा रणे हत्वा च रावणम् /
ररक्ष लोकान् वैकुण्ठः स मां रक्षतु चिन्मयः // ९

इति उत्तरकाण्डम् सम्पूर्णम्

इति श्रीरामोदन्तम् सम्पूर्णम्